शकुन्तला—(भूयः पितरमाश्लिष्य) तवच्चरणपीडिदं तादसरीरं। ता मा अदिमेत्तं मम किदे उक्कंठिदुं। [तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मम कृत उत्कण्ठितुम्।]

काश्यपः—(सनिश्श्वासम्)

शममेष्यति मम शोकः कथं नु वत्से ! त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥२१॥

गच्छ; शिवास्ते पन्थानः सन्तु।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ — (शकुन्तलां विलोक्य) हद्धी हद्धी। अंतलिहिदा सउंदला वणराईए। [हा धिक् हा धिक्। अन्तर्हिता शकुन्तला वनराज्या।]

काश्यपः— (सनिश्श्वासम्) अनसूये ! गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्।

उभे — ताद ! सउंदलाविरहिदं सुण्णं विअ तवोवणं कहं पविसावो ? [तात ! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ?]

शकुन्तला—(पिता से दुबारा लिपट कर) आप का शरीर तपस्या करने से दुर्बल हो गया है अतः आप मेरे लिये अधिक उत्कंठित न होना।

कण्व— (दीर्घ श्वास लेकर)

वत्से ! पहले तुम्हारे हाथ से बोये हुये, पर्णशाला के द्वार पर उगे हुये नीवार अन्न को देखकर मेरा शोक कैसे शांत हो सकेगा ? ॥२१॥

जाओ, पथ तुम्हारा कल्याणकारी हो।

(शकुन्तला और उसके साथी चले जाते हैं)

दोनों सखियाँ—(शकुन्तला को देखकर) हा, हा, शकुंतला को वनश्रेणी ने छिपा लिया।

कण्व— (दीर्घ सांस लेकर) अनसूया ! आपकी सखी चली गई। शोक को रोक कर तुम दोनों मेरे साथ चली आओ।

दोनों सखियाँ—पिता जी ! शकुंतला के बिना इस सूने से वन में हम कैसे प्रवेश करें ?

काश्यपः— स्नेहप्रवृत्तिरेवंदर्शिनो । (सविमर्शं परिक्रम्य) हन्त भोः ! शकुन्तला पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥२२॥

(इति निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः समाप्तः ।

कण्व — प्रेम के प्रवाह से ही ऐसा मालूम पड़ता है । (विचारते हुये चलकर) ओह ! शकुंतला को पति के घर भेजकर अब मैं निश्चित हुआ । क्योंकि कन्या-धन पराया ही होता है । आज उसे (शकुंतला को) पति के घर भेजकर मेरी आत्मा अतीव निश्चित हो गई मानो उसने किसी की धरोहर को लौटा दिया हो ॥२२॥

(सब चले जाते हैं)

चौथा अङ्क समाप्त

टिप्पणियां

कुसुमावचयम्—कुसुमानाम् अवचयः (ष० तत्पु०) तम्; अवचयः—अव+चि+अच्, दूरस्थ पुष्प आदि का दण्ड आदि द्वारा चयन के अर्थ में 'अवचय' का प्रयोग होता है। हाथ से 'पुष्पचयन' करने के अर्थ में "पुष्पावचाय" प्रयोग होगा।

गान्धर्वेण—गन्धर्व+अण्। शास्त्रोक्त विवाहों में 'गान्धर्व' विवाह का भी नाम है।

निर्वृत्ताकल्याणा—निर्वृत्तं कल्याणं यस्याः (बहु०) सा।

अनुरूपभर्तृगामिनी—अनुगतो रूपम् अनुरूपः (अव्ययीभाव), अनुरूपः भर्ता (कर्म०) अनुरूपभर्तारं गच्छतीति (उपपद तत्पु०)।

निर्वृतम्—निर्+वृ+क्त।

एतावत्—एतद्+वतुप्।

आकृतिविशेषाः—आकृतीनां विशेषाः (ष० तत्पु०), शेषे षष्ठी, अथवा—आकृतिर्विशेषो येषां ते (बहु०)।

गुणविरोधिनः—गुणान् विरुन्धन्तीति गुण+वि+रुध्+णिनि (=इन्), अथवा गुणैर्विरोधो येषां ते। "यत्राकृतिस्तत्र गुणा वसन्ति।"

अनुमतम्—अनु+मन्+क्त।

गुणवते—गुणाः सन्ति यस्येति, गुण+मतुप्।

कृतार्थः—कृतोऽर्थोऽस्येति सः।

अवचितानि—अव+चि+क्त।

बलिकर्मपर्याप्तानि—बलिकर्मणे पर्याप्तानि (चतुर्थी तत्पु०)।

सौभाग्यदेवता—सौभाग्यस्य देवता (ष० तत्पु०)।

उटजसन्निहिता—उटजे सन्निहिता (सप्तमी तत्पु०); सन्निहिता—सम्+नि+धा+क्त+टाप्

कुसुमैः अलम्—करणे तृतीया।

अतिथिपरिभाविनि—अतिथिं परिभवितुं शीलं यस्याः (बहु०) सा।

१. **विचिन्तयन्तीति। अन्वयः**—अनन्यमानसा यं विचिन्तयन्ती तपोधनं माम् उपस्थितं न वेत्सि, स बोधितः अपि सन् प्रमत्तः प्रथमं कृतां कथाम् इव त्वां न स्मरिष्यति॥

वृत्तम्—वंशस्थविलम्—उपमाऽलङ्कारः। काव्यलिङ्गञ्च।

अनन्यमानसा—अनन्यं मानसं यस्याः (बहु०) सा।

विचिन्तयन्ती—वि+चिन्त+शतृ+ङीप्।
तपोधनम्—तप एव धनं यस्य सः तपोधनः, तम्।
बोधितः—बुध्+णिच्+क्त। [१]
संवृत्तम्—सम्+वृत्+क्त।
पूजार्हे—पूजाम् अर्हतीति पूजार्हः, तस्मिन्, विषयसप्तमी।
अपराद्धा—अप+राध्+क्त+टाप्।
शून्यहृदया—शून्यं हृदयं यस्याः (बहु०), सा।
सुलभकोपः—सुलभः कोपो यस्य (बहु०) सः।
कोऽन्यो हुतवहाद्—अन्य के योग में पञ्चमी।
अर्घोदकम्—अर्घश्च उदकञ्च तयोः समाहारः, अथवा अर्घसहितम् उदकम्।
पदान्तरे—अन्यत् पदं पदान्तरम्, तस्मिन्।
आवेगस्खलितया—आवेगेन स्खलिता (तृ० तत्पु०) तया।
अग्रहस्तात्—अग्रश्चासौ हस्तश्चेति अग्रहस्तः (कर्म०) तस्मात्।
प्रकृतिवक्रः—प्रकृत्या वक्रः (तृ० तत्पु०)।
सानुक्रोशः—अनुक्रोशेन सहितः (बहु०)।
प्रेक्ष्य—प्र+ईक्ष्+क्त्वा=ल्यप्।
अविज्ञाततपःप्रभावस्य—न विज्ञातः=अविज्ञातः (नञ् तत्पु०), तपसः प्रभावः (ष० तत्पु०) तपःप्रभावः, अविज्ञातस्तपःप्रभावो यस्य (बहु०) सः, तस्य।
अन्तर्हितः—अन्तर्+धा+क्त।
आश्वासयितुम्—आ+श्वस्+णिच्+तुमुन्।
संप्रस्थितेन—सम्+प्र+स्था+क्त।
पिनद्धम्=अपिनद्धम्—भागुरि के मत में 'अपि' के अकार का लोप हो जाता है।
स्वाधीनोपाया—स्वस्मिन् अधीन उपायो यस्याः (बहु०) सा।
वामहस्तोपहितवदना—वामो हस्तः वामहस्तः (कर्म०) वामहस्ते उपहितं वदनं यया (बहु०) सा।
प्रकृतिपेलवा—प्रकृत्या पेलवा (तृ० तत्पु०)।
उष्णोदकेन—उष्णम् उदकम् उष्णोदकम् (कर्म०) तेन।

विष्कम्भकः—विष्कम्भक का लक्षण विश्वनाथ ने इस प्रकार किया है—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥

अर्थात् जिसका स्थान किसी भी अंक के आरम्भ में हो और जो भूत और भविष्य की घटनाओं पर संक्षिप्त प्रकाश डाले उसे विष्कम्भक कहते हैं ।

दुर्वासा के शाप प्रकरण से विमर्श सन्धि का आरम्भ होता है । विमर्श सन्धि का लक्षण इस प्रकार किया गया है—

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः ।
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ॥

शकुन्तला का दुष्यन्त से गान्धर्व विवाहरूपी फल प्रकट हुआ है किन्तु वह शाप से विघ्नित होकर रुक गया है, आगे नहीं बढ़ सका। चौथे अंक से लेकर छठवें अंक की समाप्ति तक विमर्श सन्धि का क्षेत्र है ।

सुप्तोत्थितः—(आदौ) सुप्तः, (पश्चाद्) उत्थितः (कर्म०) ।

प्रवासाद् उपावृत्तेन—ल्यब्लोपे पञ्चमी, प्रोष्य इत्यर्थः ।

वेलोपलक्षणार्थम्—वेलाया उपलक्षणार्थम् (ष० तत्पु०) ।

२. **यातीति** । अन्वयः—एकतः ओषधीनां पतिः अस्तशिखरं याति । एकतः अरुणपुरस्सरः अर्कः आविष्कृतः । तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोकः आत्मदशान्तरेषु नियम्यते इव ।

वृत्तम्—वसन्ततिलका । तुल्ययोगिताऽलङ्कारः ।

अस्तशिखरम्—अस्तस्य शिखरम् (ष० तत्पु०) ।

अरुणपुरस्सरः—अरुणः पुरस्सरो यस्य (बहु०) सः ।

व्यसनोदयाभ्याम्—व्यसनञ्च उदयश्चेति व्यसनोदयौ (कर्म०) ताभ्याम् ।

आत्मदशान्तरेषु—अन्या दशा दशान्तराणि, आत्मनः दशान्तराणि (ष० तत्पु०) तेषु ।

"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥" [२]

३. **अन्तर्हिते** इति । अन्वयः—शशिनि अन्तर्हिते सैव कुमुद्वती संस्मरणीयशोभा मे दृष्टिं न नन्दयति । नूनम् अबलाजनस्य इष्टप्रवासजनितानि दुःखानि अतिमात्रसुदुस्सहानि ।

वृत्तम्—वसन्ततिलका । अर्थान्तरन्यासोऽलङ्कारः ।

संस्मरणीयशोभा—संस्मरणीया शोभा यस्याः (बहु०) सा।

इष्टप्रवासजनितानि—इष्टस्य प्रवासः (ष० तत्पु०) इष्टप्रवासः, इष्ट-प्रवासेन जनितानि (तृ० तत्पु०)।

अतिमात्रसुदुस्सहानि—अतिमात्रं सुदुस्सहानि। [३]

अपटीक्षेपेण—कुछ टीकाकारों ने हलायुध कोश के अनुसार 'अपटी' और 'पटी' में अन्तर नहीं माना।

विषयपराङ्मुखस्य—विषयेभ्यः पराङ्मुखः (प० तत्पु०)।

जनस्य न विदितम्—कर्तरि षष्ठी (क्तस्य च वर्तमाने)।

शकुन्तलायाम्—आधारे सप्तमी

हस्तपादम्—हस्तौ च पादौ च (समाहारद्वन्द्व)।

असत्यसन्धे—असत्या सन्धा यस्य (बहु०) सः, तस्मिन्।

शून्यहृदया—शून्यं हृदयं यस्याः (बहु०) सा।

दुःखशीले—दुःखं शीलयतीति तस्मिन्।

सखीगामी—सखीं गामी (द्वि० तत्पु०)।

प्रवासप्रतिनिवृत्तस्य—प्रवासात् प्रतिनिवृत्तः, तस्य।

दुष्यन्तपरिणीताम्—दुष्यन्तेन परिणीता (तृ० तत्पु०) ताम्।

आपन्नसत्त्वाम्—सत्त्वम् आपन्ना—"प्राप्तापन्ने च द्वितीया" (द्वि० तत्पु०)। अथवा—आपन्नं सत्त्वं यया सा। (बहुव्रीहि)।

प्रस्थानकौतुकम्—प्रस्थानस्य कौतुकम् (ष० तत्पु०)।

सुखशयनपृच्छिका—सुखशयनं पृच्छतीति सुखशयन+प्रच्छ्+ण्वुल्।

शकुन्तलासकाशम्—शकुन्तलायाः सकाशम् (प० तत्पु०)।

लज्जावनतमुखीम्—लज्जया अवनतं मुखं यस्याः (बहु०) सा, ताम्।

परिष्वज्य—परि+स्वज्+क्त्वा=ल्यप्।

धूमाकुलितदृष्टेः—धूमेन आकुलिता दृष्टिर्यस्य (बहु०) सः, तस्य।

सुशिष्यपरिदत्ता—सुशिष्याय परिदत्ता (च० तत्पु०)।

ऋषिरक्षिताम्—ऋषिभिः रक्षिताम् (तृ० तत्पु०)।

४. **दुष्यन्तेनेति। अन्वयः**—ब्रह्मन्! भुवः भूतये दुष्यन्तेन आहितं तेजः दधानां तनयाम् अग्निगर्भां शमीम् इव अवेहि।

वृत्तम्—अनुष्टुप्। उपमाऽलङ्कारः।

अग्निगर्भाम्—अग्निः गर्भे यस्याः (बहु०) सा, ताम्। अग्नि शिव के तेज को

धारण न कर सकी। पहले गङ्गा में प्रविष्ट हुई फिर अश्वत्थ में और अन्त में शमी में। अतः यज्ञ में शमी से अग्नि को प्रगट किया जाता है। [४]

आश्लिष्य—आ+श्लिष्+क्त्वा=ल्यप्।

उत्कण्ठासाधारणम्—उत्कण्ठया साधारणम् (तृ० तत्पु०)।

चूतशाखावलम्बिते—चूतशाखायाम् अवलम्बिते (स० तत्पु०)।

नालिकेरसमुद्गके—नालिकेरस्य समुद्गकः (ष० तत्पु०), तस्मिन्।

कालान्तरक्षमा—अन्यः कालः—कालान्तरम्, कालान्तरं क्षमत इति सा (उपपद तत्पु०)।

हस्तसन्निहिताम्—हस्तयोः सन्निहिता (ष० तत्पु०) ताम्।

दूर्वाकिसलयानि—दूर्वाणां किसलयानि (ष० तत्पु०)।

मङ्गलसमालम्भनानि—मङ्गलाय समालम्भनम् (च० तत्पु०) तानि।
समालम्भन—आभूषण।

शार्ङ्गरवमिश्राः—शार्ङ्गरवः मिश्रः (=प्रधानः) येषां (बहु०) ते।
अथवा—शार्ङ्गरवेण मिश्राः (तृ० तत्पु०)।

समालम्भनहस्ता—समालम्भनानि हस्ते यस्याः (बहु०) सा।

शिखामज्जिता—शिखायां मज्जिता (सप्तमी तत्पु०)।

प्रतिष्ठितनीवारहस्ताभिः—प्रतिष्ठिताः नीवाराः हस्तेषु यासाम् (बहु०) ताः, ताभिः।

स्वस्तिवाचनिकाभिः—स्वस्ति इत्यस्य वाचनं स्वस्तिवाचनम्, स्वस्तिवाचनाय हिताभिः।

अभिनन्द्यमाना—अभि+नन्द्+य+शानच्+टाप् (कर्मणि वर्तमानकालिक कृदन्त)।

यथोद्दिष्टव्यापारा—यथोद्दिष्टो व्यापारो यस्याः (बहु०) सा; यथोद्दिष्टः-उद्दिष्टस्य अनतिक्रमः—यथोद्दिष्टम्।

आसनस्था—आसने तिष्ठतीति सा।

बहुमानसूचकम्—बहुमानस्य सूचकम् (ष० तत्पु०)।
बहुः मानः = बहुमानः।

महादेवी—महती देवी।

गौतमीवर्जम्—गौतमी वर्ज्+णमुल्।

मङ्गलसमालम्भनार्थम्—मङ्गलार्थं समालम्भनम् (च० तत्पु०)।

सुखमज्जनम्—सुखाय मज्जनम् (च० तत्पु०) ।
सखीमण्डनम्—सख्या मण्डनम् (तृ० तत्पु०) ।
आभरणोचितम्—आभरणानाम् उचितम् (ष० तत्पु०) ।
आश्रमसुलभैः—आश्रमे सुलभैः (स० तत्पु०) ।
विप्रकार्यते—वि+प्र+कृ+णिच्+लट्, स्वाथ णिच् ।
उपायनहस्तौ—उपायनं हस्तयोः ययोः (व्यधि० बहुव्री०), तौ ।
तातकाश्यपप्रभावात्—तातः काश्यपः (कर्म०) तातकाश्यपस्य प्रभावः (ष० तत्पु०) तस्मात् ।

५. **क्षौममिति** । अन्वयः—केनचित् तरुणा माङ्गल्यम् इन्दुपाण्डु क्षौमम् आविष्कृतम् । केनचित् चरणोपभोगसुलभः लाक्षारसः निष्ठ्यूतः । अन्येभ्यः आपर्वभागोत्थितैः किसलयोद्भेदप्रतिद्वन्द्विभिः वनदेवताकरतलैः आभरणानि नः दत्तानि ।

वृत्तम्—शार्दूलविक्रीडितम् । 'इन्दुपाण्डु' इत्युपमा ।
इन्दुपाण्डु—इन्दुरिव पाण्डु । **माङ्गल्यम्**—मङ्गल+ष्यञ्, मङ्गलमेव माङ्गल्यम् ।

चरणोपभोगसुलभः—चरणयोरुपभोगाय सुलभः ।
'चरणोपरागसुलभः' इति पाठान्तरम् चरणयोरुपरागे सुलभः ।
आपर्वभागोत्थितैः—पर्वणो भागः=पर्वभागः, पर्वभागात् आ=आपर्वभागम् (अव्ययीभावः), आपर्वभागम् उत्थिताः तैः ।
किसलयोद्भेदप्रतिद्वन्द्विभिः—किसलयानाम् उद्भेदाः किसलयोद्भेदाः (ष० तत्पु०) तेषां प्रतिद्वन्द्विभिः (ष० तत्पु०) । [५]
वनदेवताकरतलैः—वनदेवतानां करतलैः (ष० तत्पु०) ।
अभिषेकोत्तीर्णः—अभिषेकाद् उत्तीर्णः (ष० तत्पु०) अभिषेकं समाप्य उत्तीर्णः, ल्यब्लोपे पञ्चमी ।
वनस्पतिसेवाम्—वनस्पतीनां सेवा ताम् (ष० तत्पु०) ।
अनुपयुक्तभूषणः—अनुपयुक्तानि भूषणानि येन (बहु०) सः ।
आभरणविनियोगम्—आभरणानां विनियोगः (ष० बहु०) तम् ।
स्नानोत्तीर्णः—स्नानाद् उत्तीर्णः (ष० तत्पु०) ।

६. **यास्यतीति** । अन्वयः—शकुन्तला अद्य यास्यति इति हृदयम् उत्कण्ठया संस्पृष्टम्, कण्ठः स्तम्भितबाष्पवृत्तिकलुषः, दर्शनं चिन्ताजडम् । अहो

अरण्यौकसः मम तावत् स्नेहाद् ईदृशं वैक्लव्यम्, गृहिणः नवैः तनया-विश्लेषदुःखैः कथं नु पीड्यन्ते ?

वृत्तम्—शार्दूलविक्रीडितम् । समुच्चयोऽलङ्कारः ।

इस पद्य को संस्कृत साहित्य में उत्कृष्ट स्थान मिला है।

काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।
यास्यत्यद्येति श्लोकश्च तत्र सर्वमनोहरः ॥

स्तम्भितवाष्पवृत्तिकलुषः—स्तम्भिता वाष्पवृत्तिः (=वाष्पाणां वृत्तिः) तया कलुषः (तृ० तत्पु०) ।

चिन्ताजडम्—चिन्तया जडम् (तृ० तत्पु०) ।

अरण्यौकसः—अरण्यम् ओको यस्य (बहु०) सः, तस्य ।

तनयाविश्लेषदुःखैः—तनयया विश्लेषः (तृ० तत्पु०), तस्माद् उत्पन्नैर्दुःखैः (पञ्च० तत्पु०) । [६]

अवसितमण्डना—अवसितं मण्डनं यस्याः (बहु०) सा ।

क्षौमयुगलम्—क्षौमयोः युगलम् (ष० तत्पु०) ।

आनन्दपरिवाहिना—आनन्दं परिवाहयति इति तेन (तृ० तत्पु०) ।

सव्रीडम्—व्रीडया सह (बहु०) ।

७. **ययातेरिति** । **अन्वयः**—ययातेः शर्मिष्ठा इव (त्वं) भर्तुः बहुमता भव । सा पुरुम् इव त्वम् अपि सम्राजं सुतम् अवाप्नुहि ।

वृत्तम्—अनुष्टुप् । उपमाऽलङ्कारः ।

ययाति का विवाह वृषपर्वन् की पुत्री शर्मिष्ठा के साथ हुआ था। [७]

हुताग्नीन्—हुता अग्नयः, तान् ।

८. **अमीति** । **अन्वयः**—अमी वेदिं परितः कल्पितधिष्ण्याः समिद्धन्तः प्रान्त—संस्तीर्णदर्भाः हव्यगन्धैः दुरितम् अपघ्नन्तः वैतानाः वह्नयः त्वां पावयन्तु ।

वृत्तं त्रिष्टुभ् । परिकरोऽलङ्कारः ।

वेदिं परितः—'परितः' के योग में द्वितीया ।

कल्पितधिष्ण्याः—कल्पितानि धिष्ण्यानि येषां (बहु०) ते ।

हव्यगन्धैः—हव्यस्य गन्धः (ष० तत्पु०) तैः ।

अपघ्नन्तः—अप+हन्+शतृ, प्रथमा बहु० ।

वैतानाः—वितान+अण् [८]

प्रतिष्ठस्व—प्रति+स्था (आत्मने०), लोट् मध्यमपुरुष ।

९. **पातुमिति** । **अन्वयः**—युष्मासु अपीतेषु या प्रथमं जलं पातुं न व्यवस्यति, या प्रियमण्डना अपि भवतां स्नेहेन पल्लवं न आदत्ते, आद्ये कुसुमप्रसूतिसमये यस्या उत्सवः भवति, सा इयं शकुन्तला पतिगृहं याति सर्वैः अनुज्ञायताम् ।

वृत्तम्—शार्दूलविक्रीडितम् ।

युष्मासु—भावे सप्तमी ।

अपीतेषु—अपीतोदकेषु न पीतम् उदकं यैस्ते अपीतोदकास्तेषु (उत्तरपदलोपि बहु०) ।

प्रियमण्डना—प्रियं मण्डनं यस्याः (बहु०) सा ।

कुसुमप्रसूतिसमये—कुसुमप्रसूत्याः समयः तस्मिन् (ष० तत्पु०) । [९]

१०. **अनुमतेति** । **अन्वयः**—इयं शकुन्तला वनवासबन्धुभिः तरुभिः अनुमतगमना । यथा कलं परभृतविरुतम् एभिः ईदृशं प्रतिवचनीकृतम् ।

वृत्तम्—अपरवक्त्रा । 'वनवासबन्धुभिः' इति रूपकम् । अचेतन वृक्षों में चेतनधर्म के आरोप से समासोक्ति ।

अनुमतगमना—अनुमतं गमनं यस्याः (बहु०) सा ।

वनवासबन्धुभिः—वनवासस्य बन्धुभिः (ष० तत्पु०) ।

परभृतविरुतम्—परभृतस्य विरुतम् (ष० तत्पु०) । [१०]

११. **रम्यान्तर** इति । **अन्वयः**—कमलिनीहरितैः सरोभिः रम्यान्तरः, छायाद्रुमैः नियमितार्कमयूखतापः, कुशेशयरजोमृदुरेणुः अस्याः पन्थाः शान्ताकूलपवनश्च शिवश्च भूयात् ।

वृत्तम्—वसन्ततिलका—तुल्ययोगिताऽलङ्कारः ।

रम्यान्तरः—रम्याणि अन्तराणि यस्मिन् (बहु०) ।

कमलिनीहरितैः—कमलिनीभिः हरितानि (तृ० तत्पु०) तैः ।

छायाद्रुमैः—छायाप्रधानाः द्रुमाः (उत्तरपदलोपिकर्म०) तैः ।

नियमितार्कमयूखतापः—नियमितः अर्कमयूखानां तापो यस्मिन् (बहु०) ।

कुशेशयरजोमृदुरेणुः—कुशेशयस्य रजांस्येव मृदवो रेणवो यस्मिन् (बहु०) ।

शान्तानुकूलपवनः—शान्तः अनुकूलः पवनः यस्मिन् (बहु०) सः । [११]

ज्ञातिजनस्निग्धाभिः—ज्ञातिजन इव स्निग्धाः ताभिः।
तपोवनदेवताभिः—तपोवनस्य देवताः (ष० तत्पु०) ताभिः।
अनुज्ञातगमना—अनुज्ञातं गमनं यस्याः (बहु०) सा।
आर्यपुत्रदर्शनोत्सुकायाः—आर्यपुत्रस्य दर्शने उत्सुका (तत्पु०) तस्याः।
तपोवनविरहकातरा—तपोवनस्य विरहेण कातरा (तत्पु०)।
उपस्थितवियोगस्य—उपस्थितो वियोगो यस्य (बहु०) सः, तस्य।

१२. उद्गलितेति। अन्वयः—मृग्यः उद्गलितदर्भकवलाः, मयूराः परित्यक्तनर्तनाः, अपसृतपाण्डुपत्राः लताः अश्रूणि मुञ्चन्ति इव॥
वृत्तम्-आर्या। अश्रूणीव-इत्युत्प्रेक्षा।
उद्गलितदर्भकवलाः—उद्गलिताः दर्भकवलाः यासां (बहु०) ताः।
परित्यक्तनर्तनाः—परित्यक्तं नर्तनं यैः (बहु०) ते।
अपसृतपाण्डुपत्राः—अपसृतानि पाण्डुपत्राणि याभ्यः (बहु०) ताः। [१२]
लताभगिनीम्—लतारूपां भगिनीम् (कर्म०)।
सौदर्यस्नेहम्—सौदर्यस्य स्नेहः (ष० तत्पु०) तम्।
चूतसङ्गता—चूतेन सङ्गता (तृ० तत्पु०)।

१३. सङ्कल्पितमिति। अन्वयः—मया तवार्थे प्रथममेव सङ्कल्पितम् आत्मसदृशं भर्तारं त्वं सुकृतैः गता। इयं नवमालिका चूतेन सङ्गतवती। सम्प्रति अहम् अस्यां त्वयि च वीतचिन्तः।
वृत्तम्—वसन्ततिलका। चूत और नवमालिका में नायक और नायिका का व्यवहार समारोप करने पर समासोक्ति।
आत्मसदृशम्—आत्मनः सदृशम् (ष० तत्पु०)।
वीतचिन्तः—वीता चिन्ता यस्य (बहु०) सः। [१३]
उटजपर्यन्तचारिणी—उटजस्य पर्यन्तेषु चरतीति सा (उपपद तत्पु०)।
गर्भमन्थरा—गर्भेण मन्थरा (तृ० तत्पु०)।
अनघप्रसवा—अनघः प्रसवो यस्याः (बहु०) सा।

१४. यस्येति। अन्वयः—यस्य कुशसूचिविद्धे मुखे त्वया व्रणविरोपणम् इङ्गुदीनां तैलं न्यषिच्यत, सः अयं श्यामाकमुष्टिपरिवर्धितकः पुत्रकृतकः मृगः ते पदवीं न जहाति।
वृत्तम्—वसन्ततिलका। काव्यलिङ्गम् अलंकारः।

व्रणविरोपणम्—व्रणानां विरोपणम् (ष० तत्पु०)।

कुशसूचीविद्धे—कुशानां सूचीभिः विद्धः (तत्पु०) तस्मिन्।

श्यामाकमुष्टिपरिवर्धितकः—श्यामाकानां मुष्टिभिः परिवर्धितकः (तत्पु०)

पुत्रकृतकः—पुत्रश्चासौ कृतकश्चेति (कर्म०), कृतकः—कृत एव, स्वार्थे कन्। [१४]

सहवासपरित्यागिनीम्—सहवासं परित्यजतीति सा, ताम् (उपपद तत्पु०)

अचिरप्रसूतया—न चिरम् अचिरम् (नञ् तत्पु०) अचिरं प्रसूता तया।

१५. उत्पक्ष्मणोरिति। अन्वयः—उत्पक्ष्मणोः नयनयोः उपरुद्धवृत्तिं वाष्पं स्थिरतया विहतानुबन्धं कुरु। अलक्षितनतोन्नतभूमिभागे अस्मिन् मार्गे ते पदानि विषमीभवन्ति खलु।

वृत्तम्—वसन्ततिलका। काव्यलिङ्गम् अलंकारः।

उत्पक्ष्मणोः— उद्गतानि पक्ष्माणि ययोः (बहु०), तयोः।

उपरुद्धवृत्तिम्—उपरुद्धा वृत्तिर्येन (बहु०) तम्।

विरतानुबन्धम्—विरतः अनुबन्धः यस्य (बहु०) सः, तम्।

अलक्षितनतोन्नतभूमिभागे—अलक्षितः नतः उन्नतश्च भूमिभागो यस्मिन (बहु०) तस्मिन्।

विषमीभवन्ति—अविषमाणि विषमाणि भवन्ति। अभूततद्भावे च्विः। [१५]

ओदकान्तम्—आ उदकान्तात्।

सन्दिश्य—सम्+दिश्+क्त्वा=ल्यप्।

क्षीरवृक्षच्छायाम्—क्षीरप्रधानः वृक्षः (उत्तरपदलोपि कर्म०) तस्य छाया (ष० तत्पु०) ताम्।

युक्तरूपम्—अतिशयेन युक्तम्। युक्त+रूपप्।

सन्देष्टव्यम्—सम्+दिश्+तव्य।

नलिनीपत्रान्तरितम्—नलिनीपत्रैः अन्तरितम् (तृ० तत्पु०)।

१६. एषापीति। अन्वयः—एषा अपि प्रियेण विना विषाददीर्घतरां रजनीं गमयति। आशाबन्धः गुरु अपि विरहदुःखं साहयति।

वृत्तम्—आर्या। अर्थान्तरन्यासोऽलङ्कारः।

विरहदुःखम्—विरहस्य दुःखम् (ष० तत्पु०) [१६]

१७. अस्मानिति। अन्वयः—संयमधनान् अस्मान्, आत्मनः उच्चैः कुलं च, त्वयि अस्याः कथमपि अबान्धवकृतां तां स्नेह-प्रवृत्तिं च साधु विचिन्त्य

त्वया इयं सामान्यप्रतिपत्तिपूर्वकं दारेषु दृश्या। अतः परं भाग्यायत्ताम्। तद् वधूबन्धुभिः न खलु वाच्यम्।

वृत्तम्—शार्दूलविक्रीडितम्। तुल्ययोगिताऽलंकारः। यहाँ पर 'विचिन्त्य' के साथ 'अस्मान्' इत्यादि सभी का सम्बन्ध है।

संयमधनान्—संयम एव धनं येषां (बहु०) ते, तान्।

अबान्धवकृताम्—न बान्धवकृता (नञ् तत्पु०) अबान्धवकृता ताम्। बान्धवैः कृता (तृ० तत्पु०) बान्धवकृता।

स्नेहप्रवृत्तिम्—स्नेहस्य प्रवृत्तिः (ष० तत्पु०) स्नेहप्रवृत्तिः, ताम्।

सामान्यप्रतिपत्तिपूर्वकम्—सामान्या प्रतिपत्तिः (कर्म०) तत्पूर्वकम्।

भाग्यायत्ताम्—भाग्ये आयत्ताम् (स० तत्पु०)। [१७]

वनौकसः—वनम् ओको येषां (बहु०) ते।

१८. शुश्रूषस्वेति। **अन्वयः**—गुरून् शुश्रूषस्व, सपत्नीजने प्रियसखीवृत्तिं कुरु, भर्तुः विप्रकृतापि रोषणतया प्रतीपं मा गमः। परिजने भूयिष्ठं दक्षिणा भव। भाग्येषु अनुत्सेकिनी भव। एवं यवतयो गृहिणीपदं यान्ति। वामाः कुलस्य आधयः भवन्ति।

वृत्तम्—शार्दूलविक्रीडितम्।

प्रियसखीवृत्तिम्—प्रियसख्याः वृत्तिः (ष० तत्पु०) ताम्।

सपत्नीजने—सपत्नी—समानः पतिरस्या इति।

गृहिणीपदम्—गृहिण्याः पदम् (ष० तत्पु०)। [१८]

मलयतरून्मलिता—मलयतरोः उन्मूलिता (प० तत्पु०)।

देशान्तरे—अन्यो देशः देशान्तरम्।

१९. अभिजनवत इति। **अन्वयः**—अभिजनवतो भर्तुः श्लाघ्ये गृहिणीपदे स्थिता, तस्य विभवगुरुभिः कृत्यैः प्रतिक्षणम् आकुला, अचिरात् प्राची अर्कम् इव पावनं तनयं प्रसूय, वत्से ! मम विरहजां शुचं त्वं न गणयिष्यसि।

वृत्तम्—हरिणी। उपमालङ्कारः।

विभवगुरुभिः—विभवेन गुरुभिः (तृ० तत्पु०)।

विरहजाम्—विरहाज्जाताम्। [१९]

प्रत्यभिज्ञानमन्थरा—प्रत्यभिज्ञाने मन्थरा (स० तत्पु०)।

आत्मनामधेयाङ्कितम्—आत्मनो नामधेयेन अङ्कितम् (तृ० तत्पु०)।

युगान्तरम्—अन्यत् युगम् ।

२०. भूत्वेति । अन्वयः—चिराय चतुरन्तमहीसपत्नी भूत्वा, अप्रतिरथं दौष्यन्तिं तनयं निवेश्य तदर्पितकुटुम्बभरेण भर्त्रा सार्धम् अस्मिन् शान्ते आश्रमे पदं करिष्यसि ।

वृत्तम्—वसन्ततिलका । काव्यलिङ्गम् अलङ्कारः ।

चतुरन्तमहीसपत्नी—चत्वारोऽन्ता यस्याः (बहु०) सा चतरन्ता । चतुरन्ताया मह्याः सपत्नी (ष० तत्पु०) ।

दौष्यन्तिम्—दुष्यन्तस्यापत्यं पुमान् इति दौष्यन्तिः, तम् ।

अप्रतिरथम्—प्रतिरथः =प्रतिगतो रथः, अविद्यमानः प्रतिरथो यस्य (बहु०) सः अप्रतिरथः तम् ।

तदर्पितकुटुम्बभरेण—तस्मिन्नर्पितः कुटुम्बस्य भरो येन (बहु०) सः, तेन ।[२०]

गमनवेला—गमनस्य वेला (ष० तत्पु०) ।

तपोऽनुष्ठानम्—तपसः अनुष्ठानम् (ष० तत्पु०) ।

तपश्चरणपीडितम्—तपश्चरणेन पीडितम् (तृ० तत्पु०) ।

२१. शममिति । अन्वयः—वत्से त्वया रचितपूर्वम् उटजद्वारविरूढं नीवारबलिं विलोकयतः मम शोकः कथं नु शमम् एष्यति ।

वृत्तम्—आर्या । काव्यलिङ्गम् अलङ्कार ।

रचितपूर्वम्—पूर्वं रचितम् ।

उटजद्वारविरूढम्—उटजस्य द्वारे विरूढः, तम् (तत्पु०) ।

नीवारबलिम्—नीवारमयं बलिम् (उत्तरपदलोपिकर्म०) । [२१]

सहधर्मचारिणी—सहधर्मं चरतीति सा ।

शकुन्तलाविरहितम्—शकुन्तलया विरहितम् (तृ० तत्पु०) ।

स्नेहप्रवृत्तिः—स्नेहस्य प्रवृत्तिः (ष० तत्पु०) ।

एवंदर्शिनी—एवं+दृश्+णिच्+णिनि+ङीप् । एवं दर्शयतीति सा ।

२२. अर्थ इति । अन्वयः—कन्या परकीय एव हि अर्थः । ताम् अद्य परिग्रहीतुः सम्प्रेष्य अयं मम अन्तरात्मा प्रत्यर्पितन्यास इव प्रकामं विशदो जातः ।

वृत्तम्—इन्द्रवज्रा । उत्प्रेक्षाऽलङ्कारः ।

प्रत्यर्पितन्यासः—प्रत्यर्पितः न्यासः येन (बहु०) सः । [२२]

—:o:—

अनुवाद चन्द्रिका

पं० चक्रधर 'हंस' नौटियाल, एम० ए०, एल० टी०, शास्त्री

यह पुस्तक हाईस्कूल तथा इण्टरमीडियेट कक्षाओं के छात्रों को सरल तथा वैज्ञानिक ढंग से संस्कृत-हिन्दी अनुवाद सिखाने के उद्देश्य से लिखी गई है। इसमें बहुत ही सरल पद्धति द्वारा अनुवाद के मूलभूत नियमों का विवेचन किया गया है। व्याकरण तथा अनुवाद दोनों का परस्पर घनिष्ठ सम्बन्ध होने से इस पुस्तक में व्याकरण के नियमों का भी रोचक वर्णन है। आवश्यक शब्द-रूप तथा धातु-रूप भी साथ में दिये हुए हैं जिससे पुस्तक की उपयोगिता और भी बढ़ गई है। प्रत्येक पाठ के साथ अनुवादोपयोगी शब्दावली दी हुई है। संस्कृत भाषा से हिन्दी भाषामें अनुवाद करने के लिए संस्कृत साहित्य के बहुत ही उत्तम तथा उपयुक्त अंशों का संकलन किया गया है जिनक अनुशीलन से विद्यार्थियों को शुद्ध तथा उत्कृष्ट शैली में संस्कृत लिखने का अभ्यास हो सकता है। पुस्तक के अन्त में यू० पी० तथा पंजाब की परीक्षाओं के अनुवाद-सम्बन्धी प्रश्नपत्र भी दिये हैं, और अन्त में उपयोगी टिप्पणियां जोड़ कर पुस्तक को विद्यार्थियों के लिए उपादेय बना दिया गया है। द्वादश संस्करण मूल्य ३)

सरल संस्कृत व्याकरण

प्रो० सत्यांशुमोहन मुखोपाध्याय एम० ए०, एल० टी०

टीचर्स ट्रेनिंग कालेज, काशी हिन्दू विश्वविद्यालय। प्रवीण शिक्षा शास्त्री और मान्य लेखक मुखोपाध्याय जी का विश्वास है कि संस्कृत व्याकरण अन्य भाषाओं के व्याकरणों की तुलना में कठिन नहीं है। यदि संस्कृत व्याकरण 'अ-सरल' जान पड़ती है तो इसका उत्तरदायित्व आज की शिक्षण पद्धति और देशी-विदेशी भाषाओं में लिखी गई पुस्तकों पर है।

इस विश्वास के साथ मुखोपाध्याय महोदय ने हाई स्कूल, एडमिशन और इण्टरमीडिएट की परीक्षाओं में बैठने वाले विद्यार्थियों के लिए यह अत्यन्त उपयोगी पुस्तक उपस्थित की है। विद्वानों का कहना है कि पुस्तक में विषय का विन्यास ऐसे नवीन एवं सरल रूप में हुआ है कि महर्षि पाणिनि के मार्मिक सिद्धान्त मनोरम एवं हृदयग्राही हो गये हैं। परीक्षा में सफलता प्राप्त करने के साथ-साथ जो विद्यार्थी महामति पाणिनि के सिद्धान्त को भी पूर्णतया समझना चाहते हैं वे इस पुस्तक से अवश्य लाभ उठावें। पौने तीन सौ पृष्ठ और नयनाभिराम छपाई। मूल्य केवल २)

पुस्तक मिलने का पता:—

मोतीलाल बनारसीदास, प्रकाशक तथा पुस्तकविक्रेता

बंगलोरोड, जवाहरनगर, दिल्ली—६